मीमांसापरिभाषा

४३५०

ॐ श्रीगणेशाय नमः ॐ सूर्यनारायणं वंदे देवीं त्रिपुरसुंदरीं गुरून् पितृगतांश्चापि निरंतरमहं भजे १ बालानां शास्त्रसिद्धार्थलेशबोधा
य धीमतो मीमांसापरिभाषेयं क्रियते कृष्णयज्वना २ इह खलु महर्षिणा जैमिनिना द्वादशलक्षण्यां पूर्वमीमांसायां धर्मो वेदानुष्ठा
योगितया विचारितो तत्र वेदबोधितेष्टसाधनताको धर्मः यथा यागादिः वेदबोधितानिष्टसाधनताकोऽधर्मः यथा कलंजभ
क्षणादिः तयोश्च वेदः स्मृतिराचारश्च प्रमाणं तत्र वेदः स्वतंत्रप्रमाणं इतरौ तु वेदमूलकतया प्रमाणं तत्र वेदो द्विविधः मंत्ररूपो
ब्राह्मणरूपश्चेति तत्र प्रयोगकालीनार्थस्मरणहेतुतया मंत्राणामुपयोग इति वक्ष्यते प्रयोगोऽनुष्ठानं तत्कालीनेत्यर्थः विधा
यकं वाक्यं ब्राह्मणं शेषश्चार्थवादः तस्य विधेयप्राशस्त्यप्रतीतिजननद्वारा विधिवाक्यैकवाक्यतया प्रामाण्यमिति वक्ष्यते तच्चाने
कविधं कर्मोत्पत्तिवाक्यं गुणवाक्यं फलवाक्यं फलाय गुणवाक्यं सगुणकर्मोत्पत्तिवाक्यमित्यादिभेदात् तत्र येन वाक्येनेदं क
र्म कर्तव्यमिति बोध्यते तत्कर्मोत्पत्तिवाक्यं यथाग्निहोत्रं जुहोतीति अत्राग्निहोमः कर्तव्यतया विधीयते इति कर्मोत्पत्तिवाक्यं
विहितेन कर्मणा तदंगतया द्रव्यदेवतादिविधायकं वाक्यं गुणवाक्यं यथा दध्ना जुहुयादिति गुणवाक्यमिदम् कर्मांगतया विहि
तत्वमेव दध्यादेर्गुणत्वम् अत्र होमस्योद्देश्यत्वेन मानान्तरप्राप्तत्वे सति विधेयान्वयितया निर्देश्यत्वम् तस्यैव मानान्तरप्रा
प्तस्य पुनः कथ्यमानरूपत्वमनुवाद्यत्वं दध्यादिगुणान्वयितया प्राप्यमेव दध्यादेस्तु मानांतराप्राप्तत्वादत्रैव विधेयत्वम्
होमसाधनत्वाद्धोमापेक्षया गुणत्वं पुरुषेणानुष्ठीयमानत्वाद्बोपादेयत्वं चेति अत्र मानांतरप्राप्तत्वं मानांतरज्ञातत्वम् १

अप्राप्तं वा ज्ञाततत्त्वमिति बोध्यम् उत्पन्नस्य कर्मणः फलाकांक्षायां फलसंबंधबोधको विधिः फलविधिः ३ यथा ऽग्निहोत्रं जुहुयात्स्वर्गका
म इति अत्र यः स्वर्गं कामयते स तत्साधनत्वेनाग्निहोत्रनामकं होमं भावयेत्कुर्यादित्यग्निहोत्रवाक्योत्पन्नस्य कर्म्मणः फलसंबंधो बोध्यत इति फल
वाक्यमिदम् प्राप्तं कर्माश्रित्य फलाय गुणविधौ फलाय गुणवाक्यं ४ यथा दध्नेन्द्रियकामस्य जुहुयादिति अत्राग्निहोत्रवाक्योत्पन्नं होममाश्रि
त्येन्द्रियफलाय दधिरूपो गुणो विधीयते होमाश्रितेन दध्नेन्द्रियरूपं फलं भावयेदिति होमाश्रितेन होमकारकीभूतेनेत्यर्थः अयमेव
गुणफलविधिः गुणकामविधिरपि बोध्यते द्रव्यदेवतागुणविशिष्टकर्मविधायकं वाक्यं सगुणकर्मोत्पत्तिवाक्यं ५ यथा सोमेन यजेतेति
अत्र सोमलताविशिष्टो यागो विधीयते विशिष्टविधावपि विशेषणस्याप्राप्तत्वाद्विधिः क्वचित्कर्मोत्पत्तिवाक्यमेव फलसंबंधबोधकमपि भवति
यथोद्भिदा यजेत पशुकाम इति अत्रोद्भिन्नामको यागो वाक्यान्तराविहित एव पशुकामस्य पशुफलाय विधीयत इत्येकमेवेदं वाक्यं फलसा
धनयागकर्मविधायकम् प्रधानविधिरेवाङ्गविधिभिरेकवाक्यतया महावाक्यतामापन्नः सन्साङ्गविशिष्टप्रधानप्रयोगविधायकत्वात्प्र
योगविधिरित्युच्यते यथा कुठारेण द्वैधीभावं कुर्यादित्युक्ते भवत्याकांक्षा कथमनेन द्वैधीभावं कुर्यादिति तत्रोद्यमननिपतनादिसहायेने·
ति गम्यते तद्वदत्राप्यग्निप्रणयनमग्निषु समिधश्चादधातीत्याद्यैरङ्गविधिविहितप्रणयनसमिदाधानावघातनशोधनादिकाङ्गकलापजनि
तोपकारसहितेनाग्निहोत्रहोमेन स्वर्गं कुर्यादिति प्रकरणप्राप्तेन समिदाद्याकल्पितेन महावाक्येन स्वर्गाय साङ्गाग्निहोत्रप्रयोगो विधी
यत इत्येतादृशः प्रयोगविधिः अङ्गजातमेवेत्थंभाव इति इतिकर्तव्यता चेति बोध्यते अत्राग्निहोत्रहोमः प्रधानं प्रणयनादिकं सर्वमङ्ग

नन्विदमनुपपन्नमाशुतरविनाशिनां कर्मणां कालांतरभाविस्वर्गादिफलसाधनत्वानुपपत्तेरिति चेन्नैवं विहितनिषिद्धकर्मणां तत्
तद्वाक्यैस्तत्तत्फलसाधनत्वेऽवगते आशुतरविनाशिनां कर्मणां कालांतरभाविफलसाधनत्वोपपत्त्यर्थमंतरापूर्वरूपमपूर्वं क
ल्प्यते ततश्च यागादेरपूर्वद्वारा स्वर्गसाधनत्वेन साक्षात्तत्तदेव फलापूर्वं तत्करणत्वेन प्राच्योदीच्यांगविशिष्टस्य प्रधानस्य भवति न प्रधा
नमात्रस्य प्रधानमात्रादेव फलापूर्वजनने फलस्यापि तत एव सिद्धेरंगानामानर्थक्यापत्तेः ननु सर्वांगविशिष्टस्य प्रधानस्यापूर्वजनक
त्वमयुक्तम् आशुतरविनाशिनः प्रधानस्यांगसाहित्याभावादिति चेन्न प्रधानकर्मणः स्वरूपेणांगसाहित्याभावेऽपि उत्पत्त्यपूर्वद्वारा साहित्य
संभवात् प्रधानस्य सर्वांगसाहित्यसिद्ध्यर्थं प्रधानकर्मपरमापूर्वयोर्मध्ये प्रधानमात्रजन्यमुत्पत्तिनामकं किंचिदपूर्वमस्तीत्यंगीकारा
त् एवमंगानामपि परस्परसहितानामेव प्रधानोपकारकत्वात्तेषां स्वरूपेण साहित्याभावात् तदुत्पत्त्यपूर्वद्वारा साहित्यं बोध्यं अंगा
नां प्रधानोपकारकत्वं नाम प्रधानस्य फलापूर्वजननसामर्थ्योन्मुखीकरणमेव दर्शपूर्णमासयोस्तु विशेषः यदाग्नेयोऽष्टा
कपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवतीत्याग्नेययागो विहितः ताभ्यामेतमग्नीषोमीयमेकादशकपालं पूर्णमासे प्रायच्छदि
त्यग्नीषोमीययागो विहितः उपांशुयाजमंतरा यजतीति उपांशुयाजः तावब्रूतामग्नीषोमावाज्यस्यैव नावुपांशु पौर्णमास्यां यजन्निति
वाक्यात् पौर्णमास्यां विहितः एतानि पौर्णमास्यां प्रधानानि एषामाग्नेयाग्नीषोमीयोपांशुयाजानां तत्तद्वाक्यावगत पौर्णमासीशब्दस्त
त्तत्राग्नेयादिसमुदायोपस्थितिः ननु यदाग्नेय इति वाक्ये यागवाचकपदस्याश्रवणात्कथं यागविधायकत्वमिति चेन्नैवं अग्निर्देवतास्य

पुरोडाशस्येत्यर्थे विहितदेवतातद्धितांतत्वादाग्नेयशब्दः तस्य पुरोडाशपदसामानाधिकरण्यात् द्रव्यदेवतासंबंधोवगतः स यागमेतेन संभवति
द्रव्यदेवतासंबंधस्य यागादन्यत्र क्रियायामसंभवात् यागक्रियायामेव संभवो वाच्यः देवतोद्देशेन द्रव्यत्यागस्य यागरूपत्वांगीकारात् अतः
श्रुतद्रव्यदेवतासंबंधानुमितो यागो यजेतेति कल्पितपदेनाभिधीयते अग्निदेवत्यपुरोडाशद्रव्यकामावास्यादिकालकर्तव्ययागेनेष्टं भावये
दिति एवं यत्र द्रव्यदेवतासंबंधमात्रं श्रूयते सौर्यं चरुं निर्वपेदित्यादौ तत्र सूर्यदेवतासंबंधानुमितो यागो विधीयत इति न कश्चिद्दोषः न
न्वयं प्रयाजवाक्ये यजतिश्रवणेपि विपरिणामेन विधायकत्वसंभवात् एवं यत्र लिङादिर्न श्रूयते व्रीहीन्प्रोक्षति समिधो यजतीत्या
दौ तत्र विपरिणामो वाच्यः केचित्तु यजतीत्यस्य पंचमलकारत्वांगीकाराद्विधायकत्वसंभव इत्याहुः तथैंद्रं दध्यमावास्यायामैंद्रं पयो
मावास्यायामिति वाक्यविहितौ सान्नाय्ययागौ यदाग्नेय इति वाक्यविहिताग्नेयश्चामावास्यायां प्रधानो निराषां त्रयाणां य एवं विद्वानमावा-
स्यां यजत इति वाक्ये अमावास्यामिति नाम्ना द्वितीयैकवचनांतेन समुदायरूपेणानुवादः तेन वेदे यत्र दर्शशब्दो ऽमावास्याशब्दो वानु
तस्तत्र यागसमुदायोपस्थितिः त्रिकस्य त्रिकस्यामावास्यापौर्णमासीभ्यां समुदायरूपेण विहिताक्ये ऽनुवादस्य प्रयोजनं तु दर्शपौर्ण
मासाभ्यां स्वर्गकामो यजेतेत्यादौ द्विवचनोपपत्तिः अन्यथा षण्णामाग्नेयादियागानां बहुत्वात् दर्शपौर्णमासैरिति बहुवचनं स्यात् मा
नांतरेण प्राप्तार्थस्य पुनः श्रवणमनुवादः तथा फलवदाग्नेयादिसन्निधावाम्नातानि प्रयाजाघाराज्यभागानुयाजादीनि षण्णां यागाना
मंगभूतानि एवं स्थिते दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यस्यायमर्थः दर्शपूर्णमासाभ्यां समुदायाभ्यां परस्परसहिताभ्यां स्व

र्गोऽपूर्वं कुर्यादिति तत्र कथं कालद्वयवर्तिनोः समुदाययोः परस्परसाहित्याभावेपि त्रिकात् त्रिकादेकैकमपूर्वं जायते न तद्वा
राद्वयोः समुदाययोः साहित्यमित्युच्यते एकैकस्य त्रिकस्यापि त्रिकापूर्वजनकत्वं कथमित्याकांक्षायां प्रयाजानुयाजादिपूर्वोत्तरा
ङ्गकलापविशिष्टस्यैकैकस्य त्रिकस्य समुदायापूर्वजनकत्वमुच्यते एकैकत्रिकस्य सर्वाङ्गसाहित्यं स्वरूपेणानसंभवतीति त्रिभि
र्यागैस्त्रीण्युत्पत्त्यपूर्वाणि जायन्ते तद्द्वारा सर्वाङ्गसाहित्यमङ्गानामपि प्रयाजादीनां स्वरूपेण प्रधानसाहित्याभावात्तदुत्पत्त्यपूर्व
द्वारा साहित्यं वाच्यं तथा च प्रधानजन्योत्पत्त्यपूर्वाणां प्रयाजादिजन्योत्पत्त्यपूर्वैः साहित्यं यदस्ति तदेव प्रधानानामङ्गविशिष्टस्व
रूपं स्यात् एवं पौर्णमास्यामाग्नेयादिजन्यैस्त्रिभिरपूर्वैः प्रयाजादिजन्योत्पत्त्यपूर्वमेकं जन्यते तथा दर्शेप्याग्नेयैन्द्रदध्यजन्यैस्त्रिभि
रपूर्वैरङ्गोत्पत्त्यपूर्वसचिवैरेकं त्रिकापूर्वं जन्यते ताभ्यां त्रिकापूर्वाभ्यामाग्नेयाद्युत्पत्त्यपूर्वत्रितयजन्याभ्यां फलजनकीभूतं महापूर्वं
फलापूर्वं नामकं जन्यते तेन तस्य फलमिति तथा च सर्वाङ्गोपकृताभ्यां दर्शपौर्णमासाभ्यामपूर्वद्वारा स्वर्गं कुर्यादिति फलापूर्वं
निष्पत्तये साङ्गप्रधानकर्तव्यतावोधको विधिः प्रयोगविधिरिति सिद्धम् पुनरपि विधिः त्रिविधः अपूर्वविधिर्नियमविधिः परि
संख्याविधिश्चेति तत्र यो विधिरत्यन्ताप्राप्तमर्थं प्रापयति सोऽपूर्वविधिः यथा दर्शपौर्णमासप्रकरणे ब्रीहीन्प्रोक्षतीति एतद्वि
ध्यभावे दर्शपूर्णमासीयब्रीहिषु प्रोक्षणं कथमपि न प्राप्नोतीत्येतद्विधिसत्वे तत्तस्यैव ब्रीहिषु प्रोक्षणं प्राप्नोत्येवेत्यत्यन्ताप्रा
प्तप्रोक्षणप्रापकत्वादपूर्वविधिः यो विधिः पक्षे प्राप्तमर्थं नियमयति स नियमविधिः तत्रैव ब्रीहीनवहन्तीति एतद्विध्यभा ३

वेदर्शपौर्णमासिकेषु व्रीहिष्ववहन्तीतिवाक्यावगतपुरोडाशोपयोगितंडुलनिष्पत्त्यनुकूलवैतुष्यकार्योपायावहननवन्नखदावित्र
त्वविदलनमपि प्राप्नुयादिति तस्मिन्पक्षे अवहननस्याप्राप्त्यभावात्कार्यान्यथोपपत्तेरवहननस्य पाक्षिकः प्राप्तिः स्यात्तस
स्मिन्नियोगेनावहननेनैव वैतुष्यं कार्यमिति नियमे सति विदलनेन सर्वात्मना निवर्तत इति नियमविधिरयं न च वैतुष्यस्य नख
विदलनेनापि संभवादवहनननियमो व्यर्थः प्रयोजनाभावादिति वाच्यम् अवघातेनैव वैतुष्यकरणे किंविददृष्टं जन्यत इति
नियमादृष्टांगीकारात् नियमेन दृष्टकार्यालाभेप्यदृष्टस्योत्पत्तेः तच्चापूर्वोपयोगि तस्मिन्नपूर्वे दृष्टफलापूर्वे उपयुज्यते तेन निय
मापूर्वाभावे फलापूर्वमेव नोत्पद्यत इति कल्पनान्नियमापूर्वस्य न वैयर्थ्यं एवं व्रीहिसोमादिनियमविधिषु बोध्यम् द्वयोः स
मुच्चित्य प्राप्तावितरनिवृत्तिफलको विधिः परिसंख्याविधिः यथा चयनप्रकरणे इमामगृभ्णन्रशनामृतस्येत्यश्वरशना
ग्रहणांगत्वेन मंत्रविधिः एतद्ध्यभावे हि रशनाग्रहणप्रकाशको मंत्रो रशनादानप्रकाशनसामर्थ्यं हृयाल्लिंगादश्वरशना
दान इव गर्दभरशनादानेपि नियमेन प्राप्नुयात्तस्मिन्विधौ तेन मंत्रेणाश्वरशनामेवादीत न तु गर्दभरशनां सा तत्तस्मी
मेव ग्राह्येति गर्दभरशनायां मंत्रनिवृत्तिर्भवतीति द्वयोः समुच्चित्य प्राप्तावितरनिवृत्तिफलकत्वादयं परिसंख्याविधिः पूर्वं दर्श
पूर्णमासांगत्वेन प्रयाजादीनामुक्तेः तत्रांगित्वांगत्वबोधकत्वादंगप्रमाणानि श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्याभेदेन ष
ट् तत्र दध्ना जुहुयादित्यग्निहोत्रवाक्यप्राप्तहोमे जुहुयादिति प्रतत्करणेन तृतीयाश्रुत्या दधि विधीयत इति श्रुत्या दध्नोंऽगते

लिंगंनामसामर्थ्यं तच्चद्विविधं अर्थगतंशब्दगतंचेति आद्यंयथास्रुवेणावद्यतीत्यवदानसामान्यशेषत्वावगमेपिस्रुवस्यसाम-
र्थ्यरूपात्लिंगादाज्यसांनाय्यादिद्रवद्रव्यस्यावदानविशेषांगत्वं स्रुवेणपुरोडाशाद्यवदानस्यकर्तुमशक्यत्वात् शब्दगतंतुलिंग
मर्थप्रकाशनसामर्थ्यं यथाऽग्नयेजुष्टंनिर्वपामीतिमंत्रस्यनिर्वापप्रकाशनसामर्थ्यरूपाल्लिंगान्निर्वापांगत्वं यस्यमंत्रस्यय
त्प्रकाशनसामर्थ्यंतस्यतदंगत्वं पदांतरसमभिव्याहारोवाक्यंयथाऽइषेत्वेतिछिनत्तीति अत्रछेदनांगत्वंनेषेत्वेतिमंत्रोवाक्या
नविधीयते यद्वाअग्नयेजुष्टमित्यंत्रोवाअग्नयेजुष्टमित्यादिपदानांनिर्वपामीत्यनेनैकवाक्यतापन्नतान्निर्वापांगत्वं प्रकरणंनाम
परस्पराकांक्षायथादर्शपूर्णमासाभ्यांस्वर्गकामोयजेतेति अत्रदर्शपूर्णमासाभ्यांस्वर्गंपूर्वंकुर्यादित्युक्तेभवत्याकांक्षा
कथमाभ्यांस्वर्गःपूर्वंकर्तव्यमिति तथाफलवदाग्नेयादिसन्निधौसमिधोयजतितनूनपातंयजति आज्यभागौयजतीत्या-
दिभिः प्रयाजादयः फलरहिताः श्रुताः तेषांस्ववाक्येषुफलाश्रवणात् भवति प्रयोजनाकांक्षाकिमेतेषांप्रयोजनमिति
तत्रप्रयाजादीनांप्रयोजनाकांक्षायांदर्शपूर्णमासयोः कथंभावाकांक्षायांपरस्पराकांक्षालक्षणेनप्रकरणेनप्रया
जादीनांसर्वेषांदर्शपूर्णमासांगत्वंनिश्चीयते स्थानंनामसन्निधिः यथासांनाय्यपात्रसन्निधौशुंधध्वमितिमंत्रस्यपाठात्सन्निधाना
त्सांनाय्यपात्रप्रोक्षणांगत्वं समाख्यासंज्ञा यथाऽध्वर्युकांडप्रतिपादितेकर्मजातेआध्वर्यवसमाख्यावशादध्वर्योः कर्तृत्वं
ज्ञायतेतथैंद्राग्नमेकादशकपालंनिर्वपेत्प्रजाकामइत्यादिषुकाम्येष्टिसमाख्यातेषुऐंद्राग्नादियागेषुकाम्येष्टियाज्यानुवा ८

क्रमकांडसमाख्यावशाद्भावाबाधिंद्राग्नी इत्यादीनां याज्यानुवाक्यात्वेन विनियोगः विनियोगो नामांगत्वेनान्वयः श्रुत्यादीनामेक
त्रसमावेशे पूर्वं पूर्वस्य प्राबल्यमुत्तरोत्तरस्य दौर्बल्यं यथा कदाचनस्तरीरसीत्यैंद्र्या गार्हपत्यमुपतिष्ठत इत्यग्निहोत्रप्रकरणे श्रूय
ते अत्र मंत्रस्येंद्रप्रकाशनसामर्थ्यरूपात् लिंगादिंद्रोपस्थानांगत्वे प्राप्ते ऐंद्रेति तृतीया श्रुत्या गार्हपत्यमिति द्वितीया श्रुत्या च गार्ह
पत्योपस्थानांगत्वेन विधानात् लैंगिकेंद्रोपस्थाने विनियोगो बाध्यते श्रुतिर्हि स्वतो विनियोजिका लिंगं त्विंद्रप्रकाशनसामर्थ्य
मालोच्यैंद्र्येंद्रमुपतिष्ठत इति श्रुतिकल्पनाद्वारा विनियोजकमिति वाच्यं तच्चात्र न संभवति यत्र श्रुतिविनियोगो नास्ति अत्र यथैंद्रे
निर्वपामीत्यादौ तत्र मंत्रस्य निर्वापप्रकाशनसामर्थ्यमालोच्यानेन मंत्रेण निर्वापं कुर्यादिति श्रुतिकल्पनाद्वारा लिंगं विनियोजकं
भवत्येव श्रुतिकल्पनाप्रतिबंधकाभावात् तथा स्योनं ते सदनं कृणोमि तस्मिन्सीदेति अत्र तस्मिन्सीदेति तच्छब्दस्य पूर्ववा
क्यार्थसापेक्षत्वात् तया एकवाक्यत्वभावाद्वाक्यप्रमाणेन द्वयोरेकमंत्रत्वं भाति लिंगेन भिन्नमंत्रत्वं भाति आद्यस्य सदनप्रकाशन
सामर्थ्यात् तस्मिन्सीदेत्यस्य सादनप्रकाशकत्वात् तत्र वाक्यापेक्षया लिंगस्य प्राबल्याद्वाक्यं बाधित्वा लिंगेन स्योनं त इत्यस्य स
दनांगत्वं तस्मिन्सीदेत्यस्य सादनांगत्वमिति निर्णयः स्योनं त इत्यस्य तस्मिन्सीदेत्यनेनैकवाक्यत्वबलाद्यथा कथंचित्सादनसा
मर्थ्यरूपलिंगं कल्पयित्वा अनेन विशिष्टमंत्रेण सादनं कुर्यादिति श्रुतिः कल्पनीया सदनप्रकाशनरूपप्रत्यक्षलिंगेन कल्पि
तया स्योनं त इत्यनेन सदनं कुर्यादिति श्रुत्या स्योनं त इत्यस्य शीघ्रं सदने विनियोगस्तेनैव मंत्रस्य नैराकांक्ष्याद्वाक्यप्रमाणा

ह्विंगं कल्पयितात्श्रुतिकल्पना प्रतिबध्यते विलंबितत्वादिति लिंगेन वाक्यस्य बाधः एवं वाक्येन प्रकरणस्य प्रकरणेन क्रमस्य क
मी॰प॰ मात्समाख्याया बाधो वेदितव्यः तथा श्रुत्या वाक्यादेरपि बाधः तदेवमंगताबोधकप्रमाणानि श्रुत्यादीनि निरूपितानि तत्त्वांग
५ त्वं शेषत्वं पारार्थ्यमिति यावत् परोद्देशेन प्रवृत्तकृतिव्याप्यत्वं पारार्थ्यं प्रयाजादीनां दर्शपूर्णमासोद्देशेन प्रवृत्तपुरुषकृतिव्याप्य
त्वाल्लक्षणसंगतिः दर्शादेः प्रयाजाद्युद्देशेन प्रवृत्तकृतिविषयत्वाभावान्नातिव्याप्तिः केवलप्रयाजाद्युद्देश्यकस्याविदपि पुरु
षस्याप्रवृत्तेः तान्यंगानि द्विविधानि सन्निपत्योपकारकाणि आराडुपकारकाणि चेति यान्यंगानि साक्षात्परंपरया वा प्रया
नयागशरीरं निष्पादयन्ति तद्वारा तदुत्पन्नापूर्वोपयोगीनि तानि सन्निपत्योपकारकाणि यथा व्रीह्यादिद्रव्याणि तत्संस्कारावहन
नप्रोक्षणादीनि अग्न्यादिदेवतातत्संस्कारकयाज्यानुवाक्यावचनादीनि च अत्र प्रोक्षणादेर्व्रीहिगतातिशयद्वारा ऽवहननादेस्तु
षविमोकादिरूपदृष्टद्वारा व्रीह्यादीनामपि दृष्टद्वारा पुरोडाशनिष्पादकत्वेन तद्वारा यागशरीरतदुत्पन्नापूर्वोपयोगित्वं च यागस्य
देवतोद्देशेन द्रव्यत्यागरूपत्वाद्द्रव्यदेवते हि यागस्वरूपमिति सिद्धान्तात् च एतान्येव सामवायिकानीत्युच्यन्ते आत्मसमवेतापूर्वं
जनकान्याराडुपकारकाणि यथा प्रयाजाज्यभागानुयाजादीनि तानि द्रव्यगते देवतागते वा संस्कारे न जनयन्तीति किंत्वात्मग
तमदृष्टं जनयन्तीत्याराडुपकारकाणि तत्र सामान्यतः कर्म द्विविधं अर्थकर्म गुणकर्म चेति तत्रात्मगतापूर्वजनकं कर्मा
र्थकर्म यथाग्निहोत्रदर्शपूर्णमासप्रयाजादिकं गुणकर्म संस्कारजनकं तच्च द्विविधं उपयुक्तसंस्कारकमुपयोक्ष्यमाण ५

संस्कारकं च तत्रोपयुक्तसंस्कारकं प्रतिपत्तिकर्म उपयुक्तस्याऽऽकीर्णकरस्य द्रव्यस्य विहितदेशे प्रक्षेपः प्रतिपत्तिरिति लक्षणात्
यथाइडाभक्षणं कृष्णविषाणाप्रासनं चतुरवत्तहोमादिकं तन्निडाभक्षणाद्य प्रधानयागोपयुक्ताऽऽकीर्णकरपुरोडाशद्रव्यप्रक्षे
पात्मकत्वात् प्रतिपत्तिर्न युक्तं होमस्य तु यागोपयुक्तद्रव्यसंस्कारकत्वाभावात्कथं प्रतिपत्तित्वं होमस्य यागसमानकालीनत्वेन हो
मसंस्कार्यस्य चतुरवत्तादेरुपयुक्तत्वाभावादिति चेदत्राह उपयुक्तसंस्कारमात्रं प्रतिपत्तिर्नतु प्रधानयागोपयुक्तत्वं तथा सति पशोर्विश
सनानन्तरमेव यागहृदयाद्युद्धरणकालकर्तव्यस्य लोहितशकृन्निरसनस्य प्रतिपत्तित्वाभावप्रसङ्गात् यागोपयुक्तद्रव्यप्रक्षेपरूपत्वाभा
वात् तथा कृष्णविषाणाप्रासनस्यापि प्रतिपत्तित्वं न स्यात् यागाङ्गभूतकण्डूयनोपयुक्तत्वेपि यागोपयुक्तत्वाभावात् अतो यत्र क्वचनो
पयोगमात्रं विवक्षितं यत्र क्वचिदुपयोगस्तत्राप्यस्ति च यागहृदयाद्युद्धरणेनोपयुक्तस्य पशोः संबन्धिनः शकृल्लोहितस्याकीर्णक
रस्य प्रतिपत्त्यपेक्षत्वात् एवं यथाकथंचिदुपयोगो होमस्याप्यस्ति तथाहि प्रतिपत्तिस्त्रिधा प्रधानोत्तरकाला प्रधानसमकाला
प्रधानपूर्वकाला चेति तत्राद्या इडाभक्षणादिका द्वितीया होमादिका तथाहि दर्शपूर्णमासप्रकरणे श्रूयते सकृदुपस्तृणाति
द्विर्हविषोऽवद्यति सकृदभिघारयति चतुरवत्तं जुहोतीत्यत्र चतुरवत्तवाक्ये होमानुवादेन चतुरवत्तद्रव्यं तत्साधनत्वेन न विधीयते
होमस्याप्राप्तत्वेनानुवादासंभवात् न च यदाग्नेय इति वाक्याद्धोमप्राप्तिः तद्वाक्यस्य यागविधायकत्वात् न च यागहोमयोरभेद इति
वाच्यं देवतोद्देशेन द्रव्यत्यागस्य यागशब्दार्थत्वात् प्रक्षेपविशिष्टस्य यागस्य होमशब्दार्थत्वात् तत्राग्नेयचोदनया यागप्राप्तावपि प्रक्षे

मी॰प॰ ९

पोशस्याग्राग्नेनानुवादासंभवात् किन्तूपस्तरणादिरवदानाभिघारणवाक्यैः आग्नेयं चतुरवत्तमदिश्यतत्संस्कारत्वेन प्रत्येयोज्जुहोतीत्य
नेन विधीयते सर्वसंस्कारः प्रतिपत्तिरूप एव अग्नयेजुष्टमभिघारयामीत्यादिनिर्देशेयोगोगाभक्ता आदिदेवतार्थेनयायथाकथं
चिदुपयुक्तस्य पुरोडाशस्य प्रतिपत्त्यपेक्षत्वात् पानदवयवसंवद्धावदानकर्मकप्रक्षेपस्य प्रतिपत्तिकर्मतौचित्यात् सर्वसंस्कारः प्रधा
नसमकालः होमोहि वषट्कृते जुहोतीति विधानात् वषट्कारोऽत्र योजनरक्षणेऽग्रधर्पकर्तव्योपायोगोपितस्मिन्नेवक्षणेयागस्यस्मर
णार्थत्वेन वषट्कारेण स्मारितः सन् यजमानेनानुष्ठेयप्रवृत्तिनपोयोगपयसंभवात् तदिदं सर्वप्रधानाधिकरणेवार्तिके स्थिते प्र
धानपूर्वकाला प्रतिपत्तिर्यथा शकृत्संप्रविध्यति लोहितं निरस्यतीति शकृत्संप्रवेधनलोहितनिरसने इदमपि पशावनालेभा
ल्लोहितशकृतोरकर्तव्यमित्यधिकरणे स्थिते उपयोक्ष्यमाणसंस्कारोऽप्यनेकविधः साक्षाद्विनियुक्तसंस्कारः साक्षाद्विनियु
क्तस्योपकारकं तत्संस्कारः विनियोक्ष्यमाणसंस्कारश्चेति तत्राद्यो यथा व्रीहीनवहन्तीत्यादिः व्रीहिभिर्यजेतेति वाक्या
द्विनियुक्तव्रीहीणामवहननसंस्कारः द्वितीयो यथा वत्समालभेतेति दोहाङ्गत्वेन साक्षाद्विनियुक्तस्य गोद्रव्यस्योपकारको पा
वत्सस्तत्संस्कारकमिदमालम्भनं तृतीयो यथा तप्तेपयसिदध्यानयतीति अत्र सा वैश्वदेव्यामिक्षेति वाक्येन तद्वाह्येन निर्दिश्य वैश्वदे
वयागाङ्गत्वेन विनियोक्ष्यमाणे पयस्तत्संस्कारकत्वाद्विनियोक्ष्यमाणसंस्कारकं दध्यानयनं पशुपुरोडाशयागस्तु पशुकोपयोक्ष्य
माणदेवतासंस्कारार्थः त्यागांशे प्रत्यक्षार्थश्च अत्र तत्संस्कार्या अग्नीषोमदेवता या वपायागेऽप्युपयुक्तार्थत्वात् हृदयाद्यङ्गयागेषूप॰ ९

पोद्यमाणत्वाच्च स्विष्टकृद्यागोऽग्न्यंशे देवतांशे वा उपयुक्तसंस्कारार्थः त्यागांशे ग्रहणार्थश्च सूक्तवाकस्थापनप्रमाणमपि तथैव उत्तम
प्रयाजोपयोक्ष्यमाणदेवतासंस्कारत्वात् तद्देशे उपयोक्ष्यमाणसंस्कारः इतरांशे ग्रहणार्थः हृदयादिहविर्योगात्स्वे क्रियमाणे एव पा
होमोऽपि वपांशे प्रतिपत्तिरितरांशे ग्रहणार्थः इत्याभूरुक्तं केचित्तु उपयोक्ष्यमाणसंस्कारभिन्नसंस्कारककर्मत्वं प्रतिपत्तिकर्मत्वं वत्तुर
वत इत्यस्य होमेन भस्मीभूतस्य होमे उपयोक्ष्यमाणत्वाभावान्नाऽऽज्ञत्वं होमस्येति लक्षणसंगतिः अत्रायं विशेषः अर्थकर्मणि द्रव्यापे
क्षया कर्मणः प्राधान्ये कर्मणि द्रव्यस्य गुणत्वे यथाऽग्निहोत्रादौ दध्यादेर्गुणत्वं गुणकर्मणि द्रव्यस्य प्राधान्ये द्रव्ये च कर्मणो गुणत्वं
व्रीहीन्प्रोक्षति अवहन्तीत्यादौ द्वितीयया व्रीहीणां क्रियासाध्यत्वप्रतीतेः क्रियापेक्षया द्रव्यस्य प्राधान्यं प्रोक्षणादिक्रियायास्तदपेक्षया गु
णत्वमिति पुनरपि गुणकर्म चतुर्विधम् उत्पत्त्याप्तिविकृतिसंस्कृतिभेदात् तत्रोत्पत्तिसंस्कारो यथा अग्नीनादधीतेति मन्त्रविशे
षैः संभारेषु निधापितेषु आहवनीयादय उत्पद्यन्त इत्याहवनीयाद्युत्पत्तिहेतुभूतसंस्कारजनकत्वादाधानस्योत्पत्तिसंस्कारत्वं आप्तिसं
स्कारो यथा स्वाध्यायोऽध्येतव्य इत्यध्ययनेन स्वाध्यायप्राप्त्युत्पत्तिः संस्कारोऽपि विकृतिर्यथा व्रीहीनवहन्तीत्यत्र व्रीहिगतवैतुष्यरूपविकृति
जनकत्वादवहननं विकृतिसंस्कारकं संस्कृतिर्यथा व्रीहीन्प्रोक्षतीत्यत्र प्रोक्षणस्य व्रीहिगतातिशयरूपसंस्कृतिजनकत्वात्संस्कृति
रूपगुणकर्मत्वं अवघातानमध्यपनेवस्वतत्त्वे गुणकर्मनन्तकत्वं प्रोक्षणादिकं सर्वं कर्तृगतगुणकर्मेति ध्येयं अर्थकर्म त्रिविधं नित्यनै
मित्तिककाम्यभेदात् तत्र यावज्जीवमग्निहोत्रं जुहोति सायं जुहोतीति जीवनावच्छेदेन सायंप्रातःकालयोर्नियमेन कर्तव्यतयाऽवगत

मी॰प॰

मग्निहोत्रादिकं नित्यं अग्नये पथिकृते पुरोडाशमष्टाकपालं निर्वपेदिति दर्शपूर्णमासातिपातनिमित्तकं पथिकृदिष्ट्यादिकं नैमि-
त्तिकं नित्यनैमित्तिकयोरकरणे प्रत्यवायएवहृते फलं नास्तीति केचित् अन्येतु दुरितनिवृत्तिफलमस्ति नित्यनैमित्तिकैरेव कु-
र्वाणो दुरितक्षयमित्यादिवाक्यैः प्रत्यवायनिवृत्तेः फलत्वेन श्रूयमाणत्वात् नैवं वेतयोरपि काम्यत्वापत्तेः फलवत्त्वादिति वाच्यं
फलकामनापूर्वमनुष्ठानाभावात् तत्तद्विधिवाक्ये फलकाममुद्दिश्य तदर्थं फलसाधनत्वेन विधानाभावाच्च काम्यत्वानुप-
पत्तेः काम्यमपि कर्म त्रिविधं केवलमैहिकफलं आमुष्मिकफलकमैहिकामुष्मिकफलकं चेति तत्राद्यं यथा कारीर्या-
7 दि तत्रात्समपवर्तिवृष्ट्यन्नस्य संजीवनहेतुत्वहृष्टिकामिनाक्रियते नकालांतरभाविवृष्टिकामेन जन्मांतरीयवृष्टिकामेन वा
केवलामुष्मिकफलकं यथा स्वर्गार्थं दर्शपूर्णमासादिकं स्वर्गस्येहलोकभोग्यत्वाभावात् ऐहिकामुष्मिकसाधारणफल-
कं यथा वायव्यं श्वेतमालभेत भूतिकाम इति भूत्यादिफलकमित्यन्यत्र विस्तरः ननु दर्शपूर्णमासादिकर्मणां व्रीह्या-
दिद्रव्याणां च प्रत्यक्षत्वेन लौकिकत्वात्कथं वेदस्यालौकिकार्थबोधकत्वमिति चेत्कर्मणां प्रत्यक्षत्वेऽपि तेषां स्वर्गादिफलसाधनत्व-
मप्रत्यक्षमिति तत्फलसाधनतया तत्कर्म कर्तव्यमित्येवं फलसाधनतया कर्मकर्तव्यताबोधकस्य वेदस्यालौकिकार्थबोधक-
त्वात् एवं व्रीह्यादीनां प्रोक्षणादिक्रियासाधनत्वेन प्रत्यक्षत्वेऽप्यमिति तद्बोधकस्यापि वेदवाक्यस्यालौकिकार्थबोधकत्वमिति न
दोषः इदानीं विधिवाक्यस्य विधायकत्वप्रकारः कथ्यते तत्र स्वर्गकामो यजेतेत्यत्र यजिधातोरुपरितनेन प्रत्ययेपमेद्दयम·

स्ति आख्यातत्वं लिङ्त्वं चेति तत्राऽऽख्यातत्वेन सर्वलकारसाधारणेन तदवच्छेदेन लिङ्प्रत्यये धर्मद्वयमस्ति आख्यातत्वं चेति
तत्राऽऽख्यातत्वेन सर्वलकारसाधारणेन तदवच्छेदेन लिङ्प्रत्ययः पुरुषप्रवृत्तिरूपामर्थभावनां प्रतिपादयति सा चार्थभावना किं
केन कथमित्यंशत्रयविशिष्टा तथा हि यजेतेत्यत्र प्रथमं प्रत्ययेन भावयेदिति प्रतीयते सर्वेषामभिहितानां सर्वेषां कारकाणां तिङ्
तार्थक्रियान्वयनियमे सति तिङ्तार्थस्य प्राधान्यात् तत्र प्रकृत्यर्थापेक्षया प्रत्ययार्थस्य प्राधान्यात्प्रथमं प्रत्ययार्थभावनाया उपा
स्थितिरुक्ता ततः करोतिसमानार्थकभावयतेः सकर्मकत्वात् किम्भावयेदिति कर्माकांक्षायां भिन्नपदोपात्तोऽपि स्वर्गो भाव्यत्वेना
न्वेति कर्मत्वेनेत्यर्थः साध्यत्वेनेति यावत् तत्र समानपदोपात्तोऽपि यागो भाव्यत्वेनान्वेति दुःखात्मकस्य यागस्येप्सिततमत्वरूप
कर्मतायोग्यत्वात् स्वर्गस्य त्वानन्दात्मकत्वेनेप्सिततमतया कर्मत्वेनान्वययोग्यत्वात् ततश्च स्वर्गं भावयेदिति बोधो भवति
ततः केनेति करणाकांक्षायां समानपदोपात्तो यागः करणत्वेनान्वेति यागेन स्वर्गं कुर्यादिति ततः कथं यागेन स्वर्गं कुर्यादिति
कथंभावाकांक्षायां प्रयाजानुयाजादिकमङ्गजातमितिकर्तव्यतयान्वेति कथंभावाकांक्षापूरकत्वमितिकर्तव्यतात्वं य
था ओदनकामः पचेदित्यत्र लिङा भावना प्रतीयते किं भावयेदित्याकांक्षायामोदनो भाव्यत्वेनान्वेति केनेत्याकांक्षायां पा
केनेति लभ्यते कथमित्याकांक्षायां तृणफूत्कारसहितेनेति ततश्च तृणफूत्कारायुपकृतेन पाकेन तेजस्संयोगेनौदनं भाव
येदिति वाक्यार्थस्संपद्यते तद्वदेदेऽपि बोध्यः यद्वा लिङ्प्रत्ययो लिङ्त्वावच्छेदेन शाब्दभावनां प्रेरणाख्यामभिधत्ते लोकेऽपि गा

मी॰प॰
८
मानपेक्षित्वा चार्यवाक्यश्रवणानन्तरमयमाचार्यो मां गवानयने प्रेरयतीति प्रेरणाख्यव्यापारं ज्ञात्वैव शिष्यो गवानयने प्रवर्तत इत्यन्व
यव्यतिरेकाभ्यां प्रेरणाज्ञानं प्रवृत्तिकारणं प्रेरणाज्ञानस्य चान्वयव्यतिरेकाभ्यां लिङादिश्रवणजन्यत्वावधारणात् लिङादेः प्रेरणायां
शक्तिर्लोके गृह्यत इति वेदेऽपि तत्रैव शक्तिकल्पनौचित्यात् इयांस्तु विशेषः लोके गवानयनादिप्रवृत्त्यनुकूलः प्रेरणाख्यो व्या॰
पारः प्रयोक्तृपुरुषगताभिप्रायविशेषः वेदे तु प्रयोक्तृपुरुषाभावाल्लिङादिशब्दनिष्ठ एव स इत्यङ्गीक्रियते अतश्चायं शब्दनिष्ठव्यापा
रत्वाच्छाब्दीभावनेत्युच्यते यागहोमादिविषयकप्रवृत्तिहेतुत्वात्प्रवर्तना प्रेरणेति चोच्यते सैषा शाब्दीभावनाप्यंशत्रयविशिष्टा
तत्र पुरुषप्रवृत्तिरूपार्थीभावनाभाव्यत्वेनान्वेति अध्ययनावगतलिङादिकं करणत्वेनान्वेति अर्थवादप्रतिपाद्यप्राशस्त्यज्ञा
नमितिकर्तव्यतात्वेनान्वेति तत्र साङ्गवेदाध्येतारोऽधीतव्याकरणनिगमनिरुक्तादिशास्त्रव्युत्पत्तिमन्तः पुरुषाः अध्ययनगृही
तस्वाध्यायगतलिङादिभिः प्राशस्त्यज्ञानसचिवैर्यागाद्यर्थस्य कर्तव्यत्वेन बुध्वा यागादीननुतिष्ठेरन्निति शाब्दभावनाबोधः अ
नुष्ठाने कुर्युरित्यर्थः अनुष्ठाने प्रवृत्तिः तेन पुरुषप्रवृत्तेः शाब्दभावनाभाव्यत्वमुक्तम् इयं च शाब्दभावना ज्योतिष्टोमादिप्रातिस्वि
कवाक्येषु स्वरूपेण प्रतीयमानापि कर्तव्यत्वेन न प्रतीयते अर्थभावनायामेव तेषु कर्तव्यतावगमात् किं तु स्वाध्यायोऽध्येतव्य इति॰
वाक्य एव कर्तव्यत्वेन प्रतीयते न चात्रार्थभावनायागाद्यविधेयत्वमिति वाच्यं स्वाध्यायोऽध्येतव्य इति वाक्यस्यार्थभावनायामेव सक
लविधिवाक्यस्य शाब्दभावनारूपत्वात् तथा हि अधिपूर्वकादिङोऽध्ययन इति धातोः कर्मणि तव्यप्रत्ययो विहितः कर्म च स्वाध्यायः ८

प्रधानं तत्संस्कारकमध्ययनं गुणकर्म व्रीहिसंस्कारप्रोक्षणादिवत् अध्ययनजनितग्रहणसंस्कारविशिष्टस्वाध्या
यस्य प्रयोजनाकांक्षायां स्वाध्यायगततत्तल्लिङादिविशिष्टवाक्यसामर्थ्यलभ्यं पदनुष्ठानोपयिकं यागादिरूपार्थज्ञानं त
देव दृष्टत्वात् तत्कर्मानुष्ठानद्वारा स्वर्गादिरूपालौकिकश्रेयःसाधनत्वाच्च प्रयोजनं कर्मानुष्ठानायोगात् न त्वदृष्टं प्रयो
जनं दृष्टे फले संभवत्यदृष्टफलकल्पनायोगात् तथाच स्वाध्यायविधिनैव स्वाध्यायगतविधिवाक्यगतलिङादिप्रतिपा
दिताः सर्वाः शाब्दभावनाः अंशत्रयविशिष्टाः कर्तव्यत्वेन विधीयन्ते साङ्गवेदाध्ययनेन व्युत्पन्ना पुरुषाः अध्ययनगृहीत
स्वाध्यायगतलिङादिभिरर्थवादावगतप्राशस्त्यरूपांगसविधैः फलवद्यागादिकर्तव्यतां बुद्ध्वा यागादीननुतिष्ठन्तीति
अनुतिष्ठेयुः प्रवृत्तिं कुर्युरित्यर्थः तत्र पुरुषप्रवृत्तेर्भाव्यत्वेनान्वयादध्ययनावगतलिङादेः करणत्वेनान्वयात् प्राशस्त्य
ज्ञानस्येतिकर्तव्यतात्वेनान्वयात् शाब्दभावनायास्त्र्यंशत्रयवैशिष्ट्यं अर्थभावनायाश्चेष्टं तत्र समीहितस्वर्गादिभाव्यकत्व
मपि विधिवशादेव प्रवर्तनापरो विधिः यागादेः पुरुषार्थसाधनत्वे तत्र पुरुषप्रवर्तयितेन शक्नोतीति स्वभाव्यपुरुषप्रवृ
त्तिविषयस्य यागादेः पुरुषाभिलषितस्वर्गादिसाधनत्वमापादयति अन्यथास्वस्य प्रवर्तनात्वमेव न स्यात् प्रवृत्तिहेतु
व्यापारस्यैव प्रवर्तनात्वात् लङादिस्थले तु प्रवर्तनात्मकविधेरभावादर्थभावनायाः पुरुषार्थभाव्यकत्वनियमो नास्ति
भावनात्वं नाम भवितुः प्रयोजकव्यापारत्वं तत्रार्थभावनायां भवितृजायमानस्य स्वर्गादेः प्रयोजकव्यापारत्वात् लक्षणसं

मी॰प॰
८

गतिः शाब्दभावनायामपि पुरुषप्रवृत्तिरूपस्याभिवितः प्रयोजकव्यापारत्वाद्वलक्षणमेव गतिः ननु ज्योतिष्टोमेन स्वर्गकामो य
जेतेत्यत्र यागेन स्वर्गं भावयेदित्यर्थवर्णने ज्योतिष्टोमपदस्य कथमन्वय इति चेन्न भावनाकरणत्वेनाभिमतयागनामत्वेनान्व
यात् ज्योतिष्टोमनामकेन यागेनेति कथं तन्नामत्वमिति चेन्न ज्योतिराख्यास्त्रिवृदादिस्तोमा अस्मिन्सन्तीति व्युत्पत्त्या याग
नामत्वात् यागस्य त्रिवृदादिस्तोमसंबन्धः केनावगम्यत इति चेन्न त्रिवृत्स्वेव दशसप्तदशारात्रस्य स्तोमा इति वाक्यान्तरेण रा
तव्यबाह्यार्थस्य तन्नामत्वेनावगमात् एवं चाख्यातैः स्तुत्याख्यादिभिर्हेतुभिस्तन्नामत्वे बोध्ये शास्त्राहितत्वाख्यातद्व्यपदेशयोगि
कवाक्यभेदैश्चतुर्भिर्नामत्वं प्रतिपादितं तथा हि अग्निहोत्रं जुहोतीत्यत्राग्निहोत्रशब्देनाग्निदेवताख्यो गुणो न विधीयते अ
ग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोतीति वाक्यविहितेन मन्त्रेण देवतायाः प्राप्तत्वात् किंत्वग्निप्रख्यापकमग्निप्रापकं य
च्छास्त्रान्तरमग्निर्ज्योतिर्ज्योतिरग्निरित्यादिकं तेन प्राप्तमग्निसंबन्धं येन निमित्तीकृत्याग्नये होत्रं होमोऽस्मिन्निति बहुव्रीहिणाग्निहो
त्रपदस्य होमनामधेयत्वं न च होमस्याप्राप्तत्वाद्यवाग्वा पयसामर्घ्यं भावनायां करणत्वात्तन्नामत्वे अग्निहोत्रेणेति तृतीया स्यात् ज्योतिष्टो
मेनेति वदिति वाच्यं द्वितीयाया अप्यवलक्षणयाकरणार्थकत्वात् नामापि तत्करणमिति न्यायेन नामापि तस्य करणत्वायोगात्
अर्थोत्यामहोमगतसाध्यत्वानुवादकत्वेन वा द्वितीयोपपत्तेरिति तत्प्रख्यन्यायेनात्र नामत्वं तथा श्येनेनाभिचरन्यजेतेत्यत्र श्येप
नपदं यागनामधेयं नत्वयागांगत्वेन श्येनपक्षिद्रव्यगुणविधिः यथा ह वै श्येनो निपत्यादत्त एवमेवायं द्विषन्तं भ्रातृव्यं निप ८

त्वादतः स्तूयमानोपमेयव्यपदेशानुपपत्तिप्रसंगात् श्येनपक्षी यथा पदान्तरे निपत्यादत्ते एवमयमपि श्येननामकः कर्मविशे
षो भ्रातृव्यं शत्रुं निपत्यादत्त इति व्यपदेशः कर्मनामत्वपक्ष एव युज्यते यागगतया श्येनपक्षिविधेयोः साम्यस्यैवोपमानोपमेयभा
वः स्यात् स चायुक्तः तस्माच्छ्येनतुल्यताव्यपदेशाच्छ्येनपदं नामधेयं ततश्चाभिचरन् शत्रुवधकामः श्येननामकेन यागेना
भिचारं भावयेदिति वाक्यार्थः नन्वेवमप्यभिचारस्यापि वेदोक्तत्वादाभिचारिके कर्मण्यास्तिकानामपि प्रवृत्तिः स्यादिति चेन्न
वेदोक्तोऽभिचारो वेदविहितो न भवति फलत्वात् फलं न विधेयं किन्तु फलमुद्दिश्य तत्साधनत्वेन कर्मैव विधेयमिति सि
द्धान्तात् अतोऽभिचारस्याविहितत्वेन प्रत्यवायजनकत्वात् एवमुद्भिदा यजेत पशुकाम इत्यत्र पशुरूपफलाय विधित्सितस्य
यागस्योद्भित्पदं नामधेयं न तु यथाकथंचित्प्राप्तयागमुद्दिश्य तदंगतयोद्भिद्रूपगुणविधिः दध्यादिवदुद्भिन्नामकस्य गुण
स्याप्रसिद्धत्वात् यागेनोद्भिद्यते फलमनेनेति योगवचनत्वसंभवात् यागनामत्वं ननु उद्भिद्यते भूमिरनेनेति योगवशेन
खनित्रादावप्युद्भिदत्वयोगसंभवात्खनित्रादिगुणविधिः किं न स्यादिति चेन्न एतादृशस्थले गुणविधिः क्वापि वक्तुं न शक्य
ते विरुद्धत्रिकद्वयसमावेशाख्यदोषप्रसंगात् तथाहि उद्भिदा यजेत पशुकाम इत्यत्र मानान्तरेणाप्राप्तस्य यागस्या
नुवादासंभवात् पशुकर्मकभावनायां करणत्वेन यागो विधेयः यागेन पशून्भावयेदिति ततश्च यागस्य विधेयत्वं
फलं प्रति शेषतया प्रतीयमानत्वाद्गुणत्वं शेषत्वं यागतयेत्यर्थः फलसिद्ध्यर्थं पुंसानुष्ठीयमानत्वादुपादेयत्वमिति।

मी॰प॰
१०

विधेयत्वगुणतोपादेयतात्मकमेकं त्रिकयागेऽस्ति तथा यागोद्देशेनाग्निहोत्रगुणविधौ विधित्सितगुणोपेतयागस्योद्देश्यत्वमनुवा
द्यत्वे वेति द्वितीयत्रिके तदिदं त्रिकद्वयं यमनर्थलक्षणपाद्योऽग्निहोत्रविशिष्टयागविधिः स्यादेवेति वाच्यं सोमादौ गतत्वेन तदभावान्मत्व
र्थलक्षणाविशिष्टविध्यंगीकाराद् अग्निहोत्रादीनामत्वेन गतिसंभवाद्विशिष्टविध्यंगीकारायोगात् तस्माद्योगवशादग्निहोत्रादीनां
नामत्वं तथा चित्रया यजेत पशुकाम इत्यत्र चित्रापदं प्राजापत्यनामधेयं दधिमधुघृतमापो धानास्तण्डुलास्तत्संसृष्टं प्राजापत्य
मित्यत्र तत्संसृष्टं प्राजापत्यमिति सामानाधिकरण्याद्दध्यादिद्रव्यषट्कस्य प्रजापतिदेवतासंबंधः कृतः तेनानुमितो यागो विधी
यते विहितस्य यागस्य फलाकांक्षायां चित्रया यजेतेति वाक्यं फलसंबंधविधायकम् तत्र फलार्थत्वेन विधिरिति तस्य प्रा
जापत्ययागस्य दध्यादिविचित्रद्रव्यकत्वाच्चित्रापदं नामधेयं न तु अग्नीषोमीयं पशुमालभेतेति वाक्यप्राप्ते पशुयागे यजेतेत्य
नूद्य चित्रत्वस्त्रीत्वगुणद्वयविधाने मानान्तरप्राप्ते कर्मण्युद्देश्यत्वानेकगुणविधाने वाक्यभेदात् तदुक्तं प्राप्ते कर्मणि नाने
को विधातुं शक्यते गुण इति मानान्तराप्राप्तकर्मणि त्वनेकैर्देवताद्यष्टाकपालपुरोडाशामावास्यापौर्णमास्याप्यनेकगुणविशिष्टो
द्रव्यदेवतासंबंधेनानुमितो यागो विधीयत इति सिद्धान्तात् तदुक्तं अप्राप्ते तु विधीयन्ते बहवोऽप्येकयत्नत इति अथ यथा प
शुना यजेतेत्यत्र मानान्तरप्राप्ते यागे उद्देश्यतद्गततया पशुनेत्येकपदोपात्तानां पशुद्रव्यतद्गतलिंगसंख्यादीनां त्रयाणां वा
क्यभेदं विनैव विधिरंगीकृतस्तद्वदत्राप्येकपदोपात्तचित्रत्वस्त्रीत्वविशेषितपशुद्रव्यकारकस्य विधानान्न वाक्यभेदः अतएव १०

तत्रविधेयस्यपशोरुपादेयत्वात्तद्गतमेकत्वंयत्नोगततयाविवक्षितमित्येकेनैवपशुनायष्टव्यं ग्रहंसंमार्ष्टीत्यत्रोद्देश्यगतमेकत्वम
विवक्षितमितिसिद्धान्तप्रवादः कथं ग्रहंसंमार्ष्टीत्यत्रग्रहमितिद्वितीययाग्रहस्येप्सिततमत्वेनोद्देश्यत्वात्प्रयोजनवत्त्वाच्चप्राधा
न्येनगम्यते संमार्गस्तुग्रहंप्रतिगुणभूतः प्रतिप्रधानंगुणआवर्तनीयइतिन्यायाद्यावंतोग्रहास्तेषांसर्वेषांसंमार्गइतिनिश्चये
सतिकतिग्रहाः संमार्जनीयाइतिबुभुत्सायाअभावाद्उद्देश्यगतमेकत्वंश्रूयमाणमप्यविवक्षितं यद्युच्यतेनेदमुद्देश्यगतंकिं
तर्हिविधेयंग्रहंसंमृज्यात्तच्चैकमिति तथासतिविधेयभेदाद्वाक्यभेदः स्यात् तथाबुभुत्सायाअभावात् विधिनायोगाच्चोद्दे
श्यगतासंख्यानविवक्षिता उद्देश्यगतमपिविशेषणंकिंचिद्विवक्षितं यस्यविशेषणस्यविवक्षांविनोद्देश्यप्रतीतिर्नपर्यवस्य
ति यथातत्रैवग्रहत्वंविवक्षितंतद्विवक्षांविनोद्देश्यस्वरूपस्यज्ञातुमशक्यत्वात् तेनग्रहजातीयसाधनकसोमयागापूर्वार्थ
त्वात् चमसेष्वपिनसंमार्गइतिस्थिते पशुनायजेतेत्यत्रयागंप्रतिपशुर्विधेयत्वाद्गुणभूतः प्रतिगुणंप्रधानावृत्तिर्नास्तीति किं
यतापशुनायागः कर्तव्यइत्याकांक्षायामेकवचनेनप्रतीयमानंविधेयगतमेकत्वंविवक्षितमपेक्षितत्वात् किंचलिंगसंख्यावि
शेषितस्यपशुद्रव्यस्वरूपकारकस्यैकपदोपात्तस्यविधेयत्वाद्विधेयपशुद्वारातद्गतलिंगसंख्यादेरपिक्रियागतत्वादेकत्वंविवक्षि
तं अथवातृतीययाविभक्त्याभिहितयोर्लिंगसंख्ययोर्विभक्त्याभिहिततयाकरणकारकशक्त्यात्मसात्कृतयोः प्रातिपदि
कार्थपशुद्रव्येणसंबंधमनाश्रित्यतद्वदेवसाक्षात्क्रियागतेनविधानेसतियथारुणैकहायनीन्यायेनपरस्परमन्वयः यागा

गतेन विहितो यः पशुः स ग्राकः ७ुमांश्चेति यथाऽरुणया पिंगाक्ष्यैकहायन्या गवा सोमं क्रीणातीत्यत्र कारकाणां क्रियान्वयनि
यमात्करणविभक्तिभिरारुण्यपिंगाक्षीत्वादीनां वक्त्रगणे परस्परमनन्वितानामेव सोमक्रयणांगत्वेनान्वये प्राप्ते आरुण्यादेर्गुणस्या
मूर्त्तस्य स्वतः क्रियासाधनत्वायोगात् क्रियासाधनगोपरिच्छेदकत्वेन पश्चात्परस्परेण पार्ष्णिकान्वयः यथैकहायनी गौः सा
पिंगाक्षी अरुणेति तद्वत्तदेव मद्देश्यगतविशेषणमविवक्षितम् उपादेयगतं विवक्षितमिति स्थिते एवंविधविधापदेनाविव
क्षितोभयविशेषितपशुकारकस्य यजेतेति यदानुदितेः अग्नीषोमीयपशुयागे विधाने शक्यत्वात्कथमेनामतमिति चेन्न तथा स
ति प्रकृतस्य प्राजापत्ययागस्य फलसंबंधाकांक्षायाहानमप्रकृताग्नीषोमीययागस्य कल्पना च स्यात् तद्द्वयमयुक्तं तस्माज्जि
घ्रापदं कर्मनामधेयं एवं तत्प्रख्यादिभिरमतरेण सर्वं कर्मनामत्वमस्ये इत्थं विधिवाक्यस्य प्रामाण्ये विचारिते अथार्थवा
दविचारः अर्थवादानां स्वार्थपरत्वे प्रयोजनाभावादध्ययनविधिवशेन फलवदर्थज्ञानार्थं तस्यावश्यकत्वाद्विधेयग
तप्राशस्त्यप्रतिपादनद्वारा विधिवाक्यैकवाक्यतया प्रामाण्ये स चतुर्विधः निंदाप्रशंसापरकृतिपुराकल्पभेदात् तत्र निंदा
र्थवादो यथा अमत्रेवागात यदश्रोदीत्तदिमे अश्रुहिरजतं यो बर्हिषि ददाति पुरास्य संवत्सराद्गृहे रुदंतीति प्रशंसा यथा शोभते
स्य मुखं य एवं वेद वायुर्वै क्षेपिष्ठेत्येवमादिः परेणेदं महता पुरुषेण कर्म कृतमिति प्रतिपादकोऽर्थवादः परकृतिर्यथा
अग्निर्वा अकामयतेत्यादिः परप्रकृत्यैककार्यादिप्रतिपादकः पुराकल्पो यथा तमशपद्धियाधियात्वावध्यासुरित्यादिः तत्र ११

निंदार्थवादस्य विधेयान्यनिंदाद्वारा विधेयप्राशस्त्यपरत्वम् अश्रुजमित्यादि रजतनिंदाद्वारा विधेयभूतरजतदाननिषेधप्राशस्त्य
परत्वे विरोधाभावात् इतरेषां त्रयाणां साक्षात्प्राशस्त्यपरत्वमेव वायुर्वा इत्यर्थवादस्य वायुः क्षिप्रगामित्वादतीव प्रशस्ता देवता अ
तस्तद्दैवत्यं कर्म प्रशस्तमिति विधेयदेवतागतप्राशस्त्यप्रतिपादनद्वारा विध्येकवाक्यत्वम् अग्निर्वा अकामयतेत्यस्याग्निदेवत्यो
यागः पूर्वकाले अग्निना कृतस्ततोयं प्रशस्तः आधिकारिकत्वादिदानीमप्यस्मै यजमानैरेवं रूपं कर्तव्यमिति विधेयकर्मगतप्राशस्त्यद्वारा
विध्येकवाक्यत्वम् एवमन्यत्राप्यूह्यम् क्वचित्कार्यान्तरमप्यस्ति यथा अक्ताः शर्करा उपदधातीति विधावक्ता इति पदेन इव
द्रव्यसामान्ये प्रतीयते तत्र द्रव्यं किमिति संदेहे तेजो वै घृतमित्यर्थवादात् घृतमिति निश्चीयते इति तेजो वै घृतमित्यर्थवादस्य
संदिग्धार्थनिर्णायकत्वेन प्रामाण्याङ्गीकारात् मन्त्राणामध्ययनविधिना कृत्स्नस्वाध्यायस्य फलवदर्थज्ञानार्थत्वमेव न
त्वदृष्टार्थत्वे दृष्टसंभवे अदृष्टकल्पनायोगात् प्रयोगकाले कर्मज्ञानेन विना कर्मानुष्ठानायोगात् कर्मौपयिकमर्थज्ञानं मं
त्रैः क्रियते नचोपदिष्टवचनादिनाप्यर्थस्मरणसंभवादनुष्ठानोपपत्तिरिति वाच्यं मंत्रैरेवार्थं स्मृत्वानुष्ठाने सति फलं भवति ।
नान्यथेति नियमाङ्गीकारात् नियमेनादृष्टस्याङ्गीकारात् तदभावे तज्जन्यादृष्टलोपे तन्मूलं फलं न सिध्यतीति कल्पनात्
नन्वेवं मन्त्राणां स्वस्वप्रकाश्यार्थे विनियोगानामशेषत्वेनान्वयः शेषत्वेनाङ्गत्वं तत इमामगृभ्णन्रशनामिति मंत्रस्य रशना
ग्रहणसामर्थ्यमस्तीति रशनाग्रहणप्रकाशनसामर्थ्याद्धि पाक्षिमादेव रशनाग्रहणाङ्गत्वोपपत्तेः इमामगृभ्णन्रशनामृतस्ये

मी॰पं॰ तस्याभिधानीमादत्त इति वचने किमर्थमिति चेत् परिसंख्यार्थता तच्चयनप्रकरणेऽश्वरशनाग्रहणे गर्दभरशनाग्रहणे चेति द्वयम-
१२ स्ति तत्र लिंगादश्वरशनायां मंत्रप्राप्तावुच्यमानायां लिंगाविशेषाद्गर्दभरशनायामपि मंत्रः प्राप्नुयात् अतोऽश्वरशनायामेव मंत्रः का-
र्यो न गर्दभरशनायां मंत्रप्राप्तावुच्यमानायां लिंगाविशेषाद्गर्दभरशनायामपि मंत्रनिवृत्तिरूपपरिसंख्यार्थोऽयं विधिः सा च परिसं-
ख्या त्रिदोषा स्वार्थत्यागः परार्थस्वीकारः प्राप्तबाधश्चेति तत्राश्वाभिधानीमादत्त इति वाक्यस्थानेन मंत्रेणाश्वरशनादाने कु-
12 र्यादिति स्वार्थः स च त्यक्तः गर्दभरशनातो मंत्रनिवृत्तिः परार्थः स च स्वीकृतः गर्दभरशनायामपि लिंगात्प्राप्तस्य मंत्रस्य स्थाने न बा-
धश्चेति त्रिदोषा परिसंख्या गत्यभावादंगीकृता गत्यन्तरे सति सा न युक्ता एवमष्टदोषदुष्टविकल्पोऽप्यगतिकैरंगीकृतः यथा प-
दाग्नेयोऽष्टाकपालः संस्कृतः पुरोडाशो यागे गते नावगतः तत्रापूर्वविशेषस्य प्रकृतिद्रव्याकांक्षायामतिपमेनयस्य विद्रव्यस्य
प्राप्तौ व्रीहिभिर्यजेतेति वाक्याद्व्रीहयो नियम्यन्ते एवं यवैर्यजेतेति वाक्याच्च यवा अपि नियम्यन्ते तयोरेकार्थत्वाद्विकल्पः एव-
मतिरात्रे षोडशिनं गृह्णातीति अतिरात्रे षोडशिग्रहो विहितः तयोर्ग्रहणाग्रहणयोः परस्परविरुद्धयोरेकस्मिन्प्रयोगे अनुष्ठा-
तुमशक्यत्वात्क्वचित्प्रयोगे ग्रहणानुष्ठानं प्रयोगान्तरे तदभावानुष्ठानमिति तत्रापि विकल्पः स चाष्टदोषदुष्टः तथाहि पूर्वे
व्रीहिप्रयोगे यवशास्त्रस्य स्वार्थानुष्ठापकत्वलक्षणप्रामाण्यपरित्यागः अननुष्ठापकत्वलक्षणाप्रामाण्यस्वीकारः ततो
द्वितीयप्रयोगे यवानुष्ठाने पूर्वं त्यक्तं प्रामाण्यं तत्स्वीकारः स्वीकृतं यदप्रामाण्यं तत्परित्यागश्चेति यवशास्त्रे चत्वारो दोषाः १२

एवं सर्वे यवप्रयोगे व्रीहिशास्त्रे बाधादयो दोषा इत्यष्टदोषदुष्टविकल्पः स च विकल्पः क्वचिदेकार्थत्वादेकार्थत्वादित्यर्थः यथा व्रीह्यादौ त
त्र व्रीहियवयोरेकैकस्य पुरोडाशनिष्पादनसमर्थत्वाद्विकल्पः क्वचिद्वचनबलात् यथा बृहत्पृष्ठं भवतीति बृहत्साम समाख्ये पृष्ठना
मके स्तोत्रे विहिते रथन्तरं पृष्ठं भवतीति रथन्तरसाम समाख्ये पृष्ठस्तोत्रान्तरे विधीयते स्तोत्रं च प्रयाजादिवददृष्टार्थत्वादर्थकर्म स्तो
मेतु संस्कारकर्मत्वाद्गुणकर्म स्तोत्रसाधनीभूतस्तोत्रीयास्वराभिव्यक्तिरूपसंस्कारद्वारा साम्नः स्तोत्रसाधनत्वाङ्गीकारात्
प्रगीतमन्त्रसाध्यमिन्द्रादिगुणिनिष्ठगुणाभिधानकं स्तोत्रं प्रगीतमन्त्रसाध्यं साम्नामभिव्यक्तस्वरगानरसाध्यमित्यर्थः अप्रगीतम
न्त्रसाध्यगुणिनिष्ठगुणाभिधानं शस्त्रं गानक्रियाविशेषः साम स्तोत्रसाधनीभूतश्च स्तोत्रीयास्वनुगतत्रिवृत्पञ्चदशत्वादिसं
ख्याविशेषः स्तोम इत्येतेषां भेदः तथा च बृहद्रथन्तरपृष्ठयोरभिन्नपृष्ठार्थत्वेनैकार्थत्वाभावेऽपि बृहद्वा पृष्ठं कार्यं रथन्तरं वा पृष्ठं का
र्यमिति वचनबलादेव विकल्पः क्वचिद्व्यवस्थितविकल्पः द्वितीयप्रयाजकर्मणि नाराशंसतनूनपान्मन्त्रयोः एकार्थत्वाद्वि
कल्पः स च राजन्यवाशिष्ठानां नाराशंसो द्वितीयप्रयाजस्तनूनपादन्येषामिति वाक्याद्व्यवस्थित इति व्यवस्थितविकल्पः तदे
वं वेदनापरपर्यायाणां विधिवाक्यानां ग्रन्थत्रयविशिष्टभावनाविधायकत्वात्प्रामाण्यं उद्भिदादीनां नामतयार्थवादानां
विधेयप्राशस्त्यपरतया मन्त्राणामनुष्ठेयार्थस्मारकतया प्रामाण्यमिति कृत्स्नस्य वेदस्यालौकिके धर्माधर्माख्येऽर्थे प्रामाण्यं
स्थिते स्मृतयोऽपि मन्वादिप्रणीता वेदमूलकत्वात्सादृष्टकादौ धर्मे तासां प्रामाण्यं श्रौतैवरी सर्वा वेदपितयेति स्मृतिः

मी.प.
१३

प्रमाणं औदुम्बरीं स्पृष्ट्वोद्गायेदिति प्रत्यक्षश्रुतिविरुद्धत्वात्सर्ववेष्टने सति श्रुत्युक्तस्पर्शनस्य कर्तुमशक्यत्वात् वैसर्जनहोमीयं वा
सोऽध्वर्युर्गृह्णातीत्यादिस्मृतिरप्रमाणं श्रुत्यर्थविरुद्धत्वेन लोभमूलकत्वात् तथा शिष्टाचारोऽपि स्मृतिद्वारा श्रुतिमूलकत्वात्प्रमाणं
मातुलसुतापरिणयनादिशिष्टाचारस्त्वप्रमाणं मातुलस्य सुतामूढ्वेत्यादिस्मृत्या निषिद्धत्वेन स्मृतिविरुद्धत्वात् तदेवं श्रुति-
स्मृत्याचाराणां धर्माधर्मयोः प्रामाण्यमुक्तं सम्प्रति धर्माः परस्परं भिन्नाः भेदकप्रमाणानि तु शब्दान्तरादीनि तथा हि यागदानहोमा
नां यजति ददाति जुहोतीत्यपर्यायशब्दप्रतिपाद्यत्वाच्छब्दान्तरम्भेदः स्वत्वनिवृत्तिपूर्वकं परस्वत्वापादनं दानं समिधो यजतीत्या-
दीनामपि वाक्यानां मध्ये एकस्य कर्मविधायकत्वम् अन्येषां तस्मिन्कर्मणि गुणविधायकत्वमित्यत्र नियामकाभावात्सर्वेषां वि-
धायकत्वे स्थिते विहितस्य कर्मणः पुनर्विधानेऽवैयर्थ्यमिति पुनर्विधानानर्थक्यात्सर्ववाक्यविहितकर्मापेक्षयोत्तरोत्तरवाक्य-
विहितस्य कर्मणो भेदः सिध्यतीत्येतादृशस्थलेषु विशेषः पुनःश्रुतिरूपाद्यजतिपदाभ्यासात्कर्मभेदः तिस्र आहुतीर्जुहोतीत्य-
त्र जुहोतिपदाभ्यासाभावेऽपि जुहोतीत्यर्थे होमे त्रित्वसंख्यान्वयात्परस्परं भिन्नास्त्रयो होमा इति संख्यातः कर्मभेदः अथैष ज्यो-
तिरथैष विश्वज्योतिरथैष सर्वज्योतिरेतेन सहस्रदक्षिणेन यजेतेति ज्योतिष्टोमप्रकरणे श्रुतानामपि ज्योतिरादीनां त्रयाणां
यागानां ज्योतिष्टोमसंज्ञापेक्षया पृथक्संज्ञात्वकरणाज्ज्योतिष्टोमापेक्षया भेदः भिन्नसंज्ञावशादेव त्रयाणां परस्परं भे-
द इति संज्ञया कर्मभेदः तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमिति तत्र सा वैश्वदेवीति वाक्ये

१३

विश्वेदेवदेवतामिक्षाद्रव्यमेवं यागमिति यागो विधीयते वाजिभ्यो वाजिनमित्यत्रापि वाजिदेवत्यं वाजिनद्रव्यककर्मान्तरं
विधीयते न तु पूर्वविहिते वैश्वदेवयागे वाजिनद्रव्यरूपगुणो विधीयते पूर्वयागस्यामिक्षागुणावरुद्धत्वेन तत्र वाजिनस्य निवेशा
योगात् न च व्रीहियववद्विकल्पः वाजिनामिक्षयोस्समशिष्टताभावात् विषमशिष्टयोर्विकल्पायोगात् वैश्वदेवयागो
त्पत्तिवाक्य एवामिक्षागुणः शिष्यत इत्युत्पत्तिशिष्टः विधीयत इत्यर्थः वैश्वदेववाक्यादुत्तरे कर्मणि वाक्यान्तरेणाशिष्टो वि
हितो वाजिनगुणस्त्वनुशिष्टः तयोर्मध्ये चोत्पत्तिशिष्टः प्रबलः कर्मोत्पत्तिवेलायामेव कर्माङ्गत्वेन प्रमितत्वात् उत्पन्नशि-
ष्टो वाजिनगुणो नेतरे प्रमितोपि विलंबितत्वेन दुर्बलत्वात् पूर्वकर्मणि निवेशमलभमानो वाजिरूपदेवतान्तरसंबंधात्
स्ववाक्यस्य कर्मान्तरविधायकत्वमानयतीति गुणाद्भेदः तद्घनीभूते पयस्यामिक्षाशिष्टं जलं वाजिनं तथा कुंडपायिना
मयने श्रूयते उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोतीति अत्र पूर्वं कर्म किंचिदपि मन्त्रविहितं न भवति अपूर्वकर्मसन्निधान
रूपात्प्रकरणान्तरात्प्रसिद्धाग्निहोत्रे धर्मकं तन्नामकं कर्मान्तरं विधीयते न त्वग्निहोत्रशब्देन प्रसिद्धाग्निहोत्रमनूद्य गुण एव विधिः
प्राप्तकर्मणो धर्ममासरूपानेकगुणविधौ वाक्यभेदापत्तेरिति प्रकरणान्तरादत्र कर्मभेदः प्रसिद्धाग्निहोत्रं नैयमिकाग्नि
होत्रं नित्याग्निहोत्रमिति यावत् तदेवं शब्दान्तराभ्याससंख्यासंज्ञागुणनामधेयप्रकरणान्तरैः कर्मभेदो दर्शितः तत्रैव
रादिप्रमेयार्थस्त्रिविधः क्रत्वर्थः पुरुषार्थः उभयार्थश्चेति प्रयाजादिः केवलक्रत्वर्थः फलैतत्करणेन पुरुषार्थः

मी.प. यथा ज्योतिष्टोमादिः स्वर्गादयश्च इत्यादिरुभयरूपं दध्ना जुहुयादिति फलासंयुक्तवाक्येन क्रत्वर्थत्वात् यथा दध्नेन्द्रिय
१८ कामस्य जुहुयादित्यनेन फलाय विधानात् पुरुषार्थत्वात् उक्तं एकस्य तूभयरूपत्वे संयोगपृथक्त्वमिति संयोगो वाक्यं त
स्य पृथक्त्वं भेदः एकस्योभयार्थत्वे नियामक इत्यर्थः क्रत्वर्थे प्रयाजादौ क्रतुः प्रयोजकः पुरुषार्थे फलं प्रयोजकं प्रयोजक
त्वं नामानुष्ठापकत्वमित्यर्थः विधिर्यदर्थं यदनुष्ठापयति स प्रयोजकः दर्शादिविधिः स्वर्गार्थं दर्शादिकमनुष्ठापयतीति
स्वर्गादिर्दर्शादौ प्रयोजकः प्रयाजादिविधिः प्रयाजान् दर्शाद्यर्थमनुष्ठापयतीति दर्शादिः प्रयाजानां प्रयोजकः दध्यान
यनविधिर्दध्यानयनमामिक्षार्थमनुष्ठापयति न वाजिनार्थं आमिक्षार्थं दध्यानयनानुष्ठाने सति वाजिनस्य स्वतः सिद्ध
त्वात् अतश्चामिक्षैव दध्यानयने प्रयोजिका न वाजिनं पुरोडाशकपालेन तुषोपवापाङ्गत्वेन पुरोडाशकपाले विधीयते
तथापि तुषोपवापः कपालस्य प्रयोजको न भवति पुरोडाशार्थमुपात्तेनैव कपालेन तुषोपवपतीति तुषोपवापोपपत्तेर्न
पुरोडाशकपाले विधीयत इति हेतुः किन्तु पुरोडाश एव कपालस्य प्रयोजक इत्याहुस्ते न तु विधिना साङ्गप्रधानेकर्तव्यतयोपादी
यते तत्राङ्गानां प्रधानानां क्रमेण वक्तव्यत्वात् क्रमेणानुष्ठाने वाध्येत तत्क्रमनियामकं प्रमाणं किमिति चेत्तत्र श्रुत्यादीनामेव क्रम
नियामकत्वात् तथा हि अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयतीत्यत्र क्त्वाश्रुत्या गृहपतिदीक्षानन्तरं ब्रह्मदीक्षेति श्रौत
क्रमः समिधो यजति तनूनपातं यजतीत्यादौ विधिवाक्यपाठक्रमादेव समिदादियागानुष्ठानक्रमः अग्निहोत्रं जुहोति य १८

वाग्नेयवतीमत्रवागपाकस्यहोमार्थ्यंतेनपाकात्पूर्वंहोमस्यकर्तुमशक्यत्वात्पाठक्रमंत्यक्त्वाऽऽर्थक्रमस्स्वीकर्तव्यः अर्थः प्र
योजनेहोमरूपेतदर्थक्रमः स्वार्थक्रमः तेनपूर्वंपाकः पश्चाद्धोमः तथासप्तदशप्राजापत्यान्पशूनालभेतइत्यत्रसप्तदशप
शुद्रव्यकाः प्रजापतिदेवताकाः सप्तदशयागास्सहकर्तव्यत्वेनबोधिताः तत्रोपाकरणमाद्यः पदार्थः यतः कृतमिदा
रभ्यपञ्चकवनसमापनीयः नियोजनादिकेन्वयेनक्रमेणोपाकरणेप्रवृत्तेनैवक्रमेणकर्तव्येकथंप्रकृतावग्नीषोमीय
पशोरेकत्वेनोपाकरणमादौकृत्वाद्वितीयलक्षणएवनियोजनेतृतीयलक्षणएवप्रोक्षणे व्यवधानप्रयोजकाभावात् अत्रतुस
सदशपशूनांसहानुष्ठेयत्ववचनात्प्रथमतोपञ्चकाविषयीकृतमुपाकरणंस्वाश्रयकर्तव्यनियोजनकरणेषोडशलक्षणाधिकः
लक्षणाधिकलक्षणव्यवधानेशास्त्रानन्तमानमापद्येत तन्निरासायोपाकरणंयेनक्रमेणप्रवृत्तंतेनैवनियोजनादिकंकार्यमिति
प्रवृत्तिक्रमः तथाज्योतिष्टोमेग्नीषोमीयपशोरपवसथ्यमहरारभ्यक्रमेणानुष्ठेयानामग्नीषोमीयसवनीयानुबन्ध्यानांपशूनांउपाकरणं
साद्यस्काख्येसोमयागेसहपशूनालभेतेत्येकदानुष्ठानलक्षणंसाहित्यंबोधितं तदपिसवनीयस्यस्थानेविहितं तत्रप्रा
कृतक्रमंपरित्यज्यसवनीयस्यस्थानसाहित्यविधानादौनादौसवनीयपशोरुपाकरणं ततोग्नीषोमीयस्यततोनुबन्ध्यायाः
इतिस्थानक्रमः समानादिवशात्पूर्वमहवैरोपवसथ्ये तथादर्शेसान्नाय्यधर्माणांशाखाच्छेदादीनांपूर्वमाग्नेयधर्माणांनि
र्वापादीनांचानंतरंप्रकृतावपिमाख्ययोराग्नेयसान्नाय्ययागयोर्मध्येआग्नेययागस्यपूर्वमनुष्ठानान्मुख्यक्रमेणदावा

ग्रेपश्रुरोअशास्यप्रयाजशेषाभिघारणे ततः प्रयसोभिघारणमिति मन्वयागक्रमादभिघारणक्रमः इत्येवं श्रुत्यर्थपाठस्थान
मुख्यप्रवृत्तिक्रमैरेव कर्मानुष्ठानमन्यथानुष्ठाने वैगुण्यमित्यलम् इति श्रीकृष्णयज्वकृता मीमांसापरिभाषा विश्वेशो नपा
यीयतो शुभानि सेतु सर्वैर्भद्राणि पश्यतु कृष्णवर्त्म निगुणानामपेती जीवने पिजरयेत्पनुरागे श्रागतावतत्र रेवहिमानीसे॰
व्यतो हरतरेगवतीये १ नयेदितास्माहस्मिकाः भवेतिश्रुत्वापितेसेन्तुलयेतितत्वे ततेसमाद्यायसमावरेतिस्वार्थेवक्रुर्वेतियर
स्यावार्थे १ तर्षककर्ध्वशापिवानवातनीकानवीयवयसाविभाव्यते श्रातनीभवतिपत्रमेमनोधातनीश्रितमपाकनोति
कः १ ॥

५८० मीमांसापद्धति